# Dashopanishatsara ShrirAmabhadra Stotram

# દશોપનિષત્સાર શ્રીરામભદ્રસ્તોત્રમ્

## Document Information

Text title : Dashopanishatsara ShrirAmabhadra Stotram

File name : dashopaniShatsArashrIrAmabhadrastotram.itx

Category : raama, shrIdharasvAmI, upanishhat

Location : doc_raama

Author : Shridharasvami

Transliterated by : Sonali Upendra Dasare

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# દશોપનિષત્સાર શ્રીરામભદ્રસ્તોત્રમ્

(ઉપનિષદ્પઠણફલશ્રુતિઃ)
(શાર્દૂલવિક્રીડિતવૃત્તમ્)
શ્રીમદ્રામપદારવિન્દમધુ યે ભૃઙ્ગાઃ સરાગા અમી
    સેવન્તે સનકાઃ શુકાદિમુનયસ્તેષાં ન કાચિત્સ્પૃહા ।
શ્રીમદ્રામપદારવિન્દમધુનો જાનન્તિ વૈ તે રસં
    તત્સ્વાદાત્પરસૌખ્યદા ભવતિ યા સા સ્યાત્સ્થિતિર્નઃ સદા ॥ ૧॥

ઈશાવાસ્યમિદં જગત્ભવતિ ભો જીવાઃ સુખાન્વેષકાઃ
    નાસ્ત્યસ્મિન્ સુખલેશ ઇત્યુત ઇહ બ્રૂતે શ્રુતિર્મા ગૃધઃ ।
ભુઞ્જીથા ઇતરાં ચ રામપદવીં ત્યક્તેન તેનાધુના
    મોહો નાસ્તિ ન શોક ઇત્યપિ ભવેદેકાત્મતાદર્શને ॥ ૨॥

શિષ્યઃ પૃચ્છતિ કેન ખાનિ ચ મનઃ પ્રાણા ગુરો ચેશિતાઃ
    યચ્છ્રોત્રં શ્રવણસ્ય વાક્ચ વચસશ્ચિત્તસ્ય ચેતોપિ તત્ ।
ચક્ષુર્ગચ્છતિ નો મનો ન ચ વચો યત્રાસ્તિ તત્કો વદેત્
    એતત્તે પ્રભુરામરૂપમગુણં યક્ષાત્મકં સર્વભૃત્ ॥ ૩॥

શ્રેયઃ પ્રેય ઇતિ દ્વયં ખલુ તયોસ્તચ્છ્રેય એવાભયં
    ધીરો યસ્તુ વિરક્તચિત્તવિલયસન્ધન્યઃ કૃતી ચાત્મવિત્ ।
સૂર્યાચન્દ્રમસૌ ન યત્ર હુતભુગ્ રામસ્ય તસ્મિન્ પદે
    શુદ્ધે શુદ્ધજલં યથા ભવતિ સઃ સ્વાત્મૈવ વક્તિ શ્રુતિઃ ॥ ૪॥

તં વેદ્યં પુરુષં હિ વેદ ન પરં વેદ્યં ન તન્મૃત્યુભિઃ
    યોઽસ્યામેવતનૌ વિભાતિ સતતં શુભ્રો ભવત્યક્ષરઃ ।
યજ્જ્ઞાત્વા મુદમશ્રુતેઽત્ર સકલં ભદ્રં ચ સર્વજ્ઞતાં
    તચ્છ્રીરામપદસ્વરૂપમમલં જ્ઞેયં ચ ગેયં પુનઃ ॥ ૫॥

યદ્જ્ઞાનાદ્વિદિતં જગત્તદવિકૃદ્ધામસ્વરૂપં સ્વયં
    વિજ્ઞાય સ્વગુરોર્મુખાત્પરમિતો ભિન્નં ન વેત્તિ ક્વચિત્ ।

સિન્ધું પ્રાપ્ય યથા ન મુગ્ચતિ નદી વિદ્વાન પરં વિન્દતે
યો વૈ તત્પરમં ચ વેદ સતતં બ્રહ્મૈવ સ બ્રહ્મવિત્ ॥ ૬॥

ઓઙ્કારં વ્યભજચ્ચશ્રુતિર્વદતિ તદભુતં ભવિષ્યદ્ભવત્
જીવેશૌ ચ વિભાવયત્યપિ પુનર્બ્રૂતે તયોરેકતામ્ ।
યદ્જ્ઞાત્વા નિતરામભિન્નપદવીં પ્રાપ્નોત્યમાત્રાં શિવાં
શુદ્ધં તુયરિ મદં સ્ફુટં પરિમિતિ શ્રીરામભદ્રોવ્યયઃ ॥ ૭॥

સંસારસ્ય ચ રેરિવા મમ તુ યા કીર્તિર્ગિરેરુન્નતા
યતુર્ધ્વ જગતોઽસ્ય મૂલમિતિ તદ્ બ્રહ્માત્મમદ્રૂપકમ્ ।
યજ્જ્ઞાત્વા સ્વમૃતં પરં વિભુરહં બ્રૂતે ત્રિશઙ્કુર્યતઃ
તચ્છ્રીરામપ્રદારવિન્દભજને કિં વા ભવેદ્દુર્ઘટમ્ ॥ ૮॥

આનન્દાત્સમુદીર્ય યાન્બહુવિધાન્બાહ્યાન્પરાં શ્ચાપરાન્
સત્યં જ્ઞાનમનન્તમક્ષરમહં યો વેદ નિષ્કામતઃ ।
સર્વાન્ સોઽશ્રુત ઇત્યપિ શ્રુતિરહો બૂતે પરં વિન્દતે
તત્ શ્રી રામપદં ભજધ્વમધુના બ્રહ્મૈવ યન્નિભયમ્ ॥ ૯॥

યત્સૃઇઋષ્ટસ્થિતિપાલનં વિદલનં ધૃત્વાપિ સાક્ષી સ્વયં
અન્નં પ્રાણમનોમતિભ્ય ઇતિ તચ્ચાનન્દકોશાગતિમ ।
યન્માયારહિતં ચકાસ્તિ સતતં કાર્યં ન યસ્મિન્ ક્વચિત્
તચ્છ્રી રામપદં ભજામિ નિતરામાનન્દમાત્રં શિવમ્ ॥ ૧૦॥

યેનેદં મન ઇન્દ્રિયાણિ ચ તથા પ્રાણા જગજ્જાયતે
જન્માદિષ્વપિ જાગ્રદાદિષુ તથા યજ્જ્ઞાપકં વિસ્ફુટમ્ ।
યસ્મિન્સર્વજગત્પ્રતિષ્ઠિતમિદં રજ્વાં યથા હિ ભ્રમઃ
પ્રજ્ઞાનં પ્રભુરામરૂપમચલં તચ્ચિન્તયે સિદ્ધયે ॥ ૧૧॥

યો ભૂમા સુખમદ્વિતીયમધુના જાનીહિ તત્ત્વં બૃહત્
તચ્છ્રીરામપદાત્મરૂપમિતિ યત્સૂક્ષ્માચ્ચ સૂક્ષ્મં પરમ્ ।
શ્રદ્ધત્સ્વેતિ પુનશ્ચ તત્ત્વમસિ ભેરાબૂ?રતે શ્રુતિર્નૈકધા
જ્ઞાત્વા સ્વલ્પમિદં હિ મર્ત્યમિહ યત્સત્યં ભજે તત્પદમ્ ॥ ૧૨॥

બ્રહ્માગ્રે યદવેદહં પુનરિદં તત્સર્વમેવાભવત્
નાસ્ત્યસ્માદપરં યતો જગદિદં બ્રહ્મૈવ સર્વં ખલુ ।
તદ્યોઽબુધ્યત સોઽભવત્તદપરં નાસીત્સ એવાદ્વયઃ
જ્ઞાત્વા શ્રીગુરુરામરૂપમભયં ચાશ્રિત્ય ધન્યા વયમ્ ॥ ૧૩॥

દશોઽપનિષદાં સારં શ્રીરામસ્તવમુત્તમમ્ ।
યઃ પઠેચ્છૃણુ યાભક્ત્યા મુક્તિભાક્સ ભવેદ્ધ્રુવમ્ ॥

ઇતિ દશોપનિષત્સારશ્રીરામભદ્રસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sonali Upendra Dasare

---

*Dashopanishatsara ShrirAmabhadra Stotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*